धात्रीखदिरयोः क्वाथं पीत्वा च मधुसंयुतम् ।
शङ्खकुन्देन्दुधवलं जयेच्छ्वित्रं न संशयः ॥ ३७ ॥
धात्रीखदिरयोः क्वाथमवल्गुजरजोऽन्वितम् ।
पीत्वा शङ्खेन्दुकुन्दाभं हन्ति श्वित्रं न संशयः॥३८॥
ह्वारे सदग्धे गजलण्डजे च
गजस्य मूत्रेण बहुश्रुते च ।
द्रोणप्रमाणं दशभागयुक्तं
दत्त्वा पचेत् बीजमवल्गुजस्य ॥
एतद्यदा चिक्कणतामुपैति
तदाशु सिद्धां गुड़िकां प्रकुर्य्यात् ।
श्वित्रं प्रलिम्पेदथ तेन घृष्टं
तदा व्रजत्याशु सवर्णभावम् ॥ ३९ ॥
श्वेतजयन्तीमूलं पीतं पिष्टञ्च पयसैव ।
श्वित्रं विहन्ति नियतं रविवारे वैद्यनाथाज्ञा॥४०॥
गुञ्जाफलाग्निचूर्णन्तु लेपितं श्वेतकुष्ठनुत् ।
शिलापामार्गभस्माभि लिप्त्वा श्वित्रं विनाशयेत् ॥
४१ ॥ ४२ ॥
एरण्डतुलसीबीजं वागुजी चक्रमर्द्दकम् ।
तिक्तकोषातकीबीजं कृष्णाशोठस्य बीजकम् ॥
गोमूत्रदधिदुग्धैश्च पचेदष्टाजमूत्रकैः ।
कल्कं दत्त्वा शिला काशी पथ्या कुष्ठं विड़ङ्गकम्॥
कटुतैलञ्च तल्लेपाद्वृद्धा घृष्ट्वा विलेपनैः ।
पञ्चाननमिदं तैलं श्वेतकुष्ठकुलापहम्" ॥
कटुतैल शं ४ क्वाथ्यएरण्डबीजादीनां मिलित्वा शं २ कल्कशिलाकाशादीनां मिलित्वा शं १ ।
इति श्वित्रे पञ्चाननतैलम् ॥ ४३ ॥
"आरग्वधं धवं कुष्ठं हरितालं मनःशिला ।
रजनीद्वयसंयुक्तं पचेत्तैलं विधानवित् ॥
एतेनाभ्यञ्जनादेव क्षिप्रं श्वित्रं विनश्यति" ।
तिलतैल शं ४ या शं १६ कल्कमिलित शं १ ।
इति आरग्वधाद्यं तैलम् ॥ ४४ ॥
"शुद्धसूतं समं गन्धं त्रिफला भृङ्गवागुजी ।
भल्लातकं तिलः कृष्णो निम्बबीजं समं समम् ।
मर्द्दयेद्भृङ्गजद्रावैः शोष्यं पेष्यं पुनः पुनः ॥
इत्थं कुर्य्यास्त्रिसप्ताहं रसः श्वेतारिको भवेत् ।
मध्वाज्यैर्निष्कमात्रन्तु खादेत् श्वेतं विनाशयेत्"॥
इति श्वेतारिः ॥ ४५ ॥
"पिबति सकटुतैलं गन्धपाषाणचूर्णं
रविकिरणसुतप्तं पामनो यः पलार्द्धम् ।
त्रिदिनतदनुसिक्तः क्षीरभोजी च शीघ्रं
भवति कनकदीप्तिः कामरूपी मनुष्यः" ॥ ४६ ॥
"तीव्रेण कुष्ठेन परीतदेहो
यः सोमराजीं नियमेन खादेत् ।
संवत्सरं कृष्णतिलद्वितीयां
स सोमराजीं वपुषाऽतिशेते ॥ ४७ ॥
घर्म्मसेवी कदुष्णेन वारिणा वागुजीं पिबेत् ।
क्षीरभोजी च सप्ताहात् कुष्ठी कुष्ठं व्यपोहति ॥४८
अवल्गुजबीजकर्षं पीत्वा कोष्णेन वारिणा ।
भोजनं सर्पिषा कार्य्यं सर्व्वकुष्ठविनाशनम् ॥ ४९ ॥
छिन्नायाः स्वरसो वापि सेव्यमानो यथाबलम् ।
जीर्णे घृतेन भुञ्जीत मुद्गयूषौदनेन च ॥
अपि पूतिशरीरोऽपि दिव्यरूपी भवेन्नरः ॥ ५० ॥

यः खादेदभयारिष्टमरिष्टामलकानि वा ।
स जयेत् सर्व्वकुष्ठानि मासादूर्द्ध्वं न संशयः ॥५१॥५२॥
निम्बस्य पत्रं मूलानि सत्वक्पुष्पफलानि च ।
चूर्णितानि घृतक्षौद्रसंयुतानि दिने दिने ॥
लिह्यात् पिबेद्वा मूत्रेण संयुक्तान्युदकेन वा ।
मदिरामलतोयेन पयसा वा यथाबलम् ॥
भुञ्जीत घृतयूषाद्यैः शाल्यन्नं पयसापि वा ।
सर्व्वकुष्ठविसर्पार्शोनाड़ीदुष्टव्रणानपि ॥
कामलाञ्च गदानन्यांस्तथा पित्तकफात्मजान् ।
संवत्सरप्रयोगेण सर्व्ववर्ज्यविवर्ज्जितः ॥
जयत्येतत् पञ्चनिम्बं रसायनमनुत्तमम्" ॥
इति पञ्चनिम्बम् ॥ ५३ ॥
"पुष्पकाले च पुष्पाणि फलकाले फलानि च ।
संचूर्ण्य पिचुमर्द्दस्य त्वङ्मूलानि दलानि च ॥
द्विरंशानि समाहृत्य भागिकानि प्रकल्पयेत् ।
त्रिफलात्र्यूषणं ब्राह्मी श्वदंष्ट्रारुष्कराग्निकाः॥
विड़ङ्गसारवाराहीलौहचूर्णामृताः समाः ।
हरिद्राद्वयावल्गुजव्याधिघाताः सशर्कराः ॥
कुष्ठेन्द्रयवपाठाश्च कृत्वा चूर्णं सुसंयुतम् ।
खदिरासननिम्बानां घनक्वाथेन भावयेत् ॥
सप्तधा पञ्चनिम्बञ्च मार्कवस्वरसेन च ।
स्निग्धशुद्धतनुर्धीमान् योजयेच्च शुभे दिने ॥
मधुना तिक्तहविषा खदिरासनवारिणा ।
सेव्यमुष्णाम्बुना वापि कोलवृद्ध्या पलं पिबेत् ॥
तिक्तहविषा वक्ष्यमाणपञ्चतिक्तघृतेन ॥
जीर्णे च भोजनं कार्य्यं स्निग्धं लघु हितञ्च यत् ॥
विचर्च्चिकोडुम्बरपुण्डरीक-
कपालदद्रूकिटिभालसादि ।
शतारुविस्फोटविसर्पपामां
कुष्ठप्रकोपं विविधं किलासम् ॥
भगन्दरं श्लीपदवातरक्तं
जड़ान्ध्यनाड़ीव्रणशीर्षरोगान् ।
सर्व्वप्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति ॥
स्थूलोदरः सिंहकृशोदरश्च
सुश्लिष्टसन्धिर्मधुनोपयोगात् ।
समोपयोगादपि ये दशन्ति
सर्पादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
शुभे रतश्चन्द्रसमानकान्तिः" ॥
इति पञ्चनिम्बः ॥ ५४ ॥
"अमृतायाः पलशतं दशमूल्यास्तथा शतम् ।
पाठामूर्व्वाबलातिक्तादार्व्वीगन्धर्व्वहस्तकाः ॥
एषां दशपलान् भागान् विभीतक्याः शतं हरेत् ।
द्वे शते च हरीतक्या आमलक्यास्तथा शतम् ॥
जलद्रोणद्वये पक्त्वा अष्टभागावशेषितम् ।
प्रस्थं गुग्गुलुमाहृत्य प्रस्थार्द्धञ्च घृतं पचेत् ॥
पाकसिद्धौ प्रदातव्यं गुड़ूच्याः सत्त्वमेव च ।
पलद्वयं तथा शुण्ठ्याः पिप्पल्याश्च पलद्वयम् ॥
ततो मात्रां प्रयुञ्जीत ज्ञात्वा दोषबलाबलम् ।
अष्टादशसु कुष्ठेषु वातरक्तगदेषु च ॥
कामलामामवातञ्च अग्निमान्द्यं भगन्दरम् ।

पीनसञ्च प्रतिश्यायं श्लीहानमुदरं तथा ॥
एतान् रोगान्निहन्त्याशु भास्करस्तिमिरं यथा" ॥
अमृतागुग्गुलुः । अयं वातरक्ते प्रशस्तः ॥ ५५ ॥
"निम्बामृतावृषपटोलनिदिग्धिकानां
भागान् पृथग्दशपलान् विपचेद्घटेऽपाम् ।
अष्टांशशेषितरसेन सुनिश्चितेन
प्रस्थं घृतस्य विपचेत् पिचुभागकल्कैः ॥
पाठाविड़ङ्गसुरदारुगजोपकुल्या-
द्विक्षारनागरनिशामिसिचव्यकुष्ठैः ।
तेजोवतीमरिचवत्सकदीप्यकाग्नि-
रोहिण्यरुष्करवचाकणमूलयुक्तैः ॥
मञ्जिष्ठयातिविषया वरया यमान्या
संशुद्धगुग्गुलुपलैरपि पञ्चसंख्यैः ।
तत् सेवितं विधमति प्रबलं समीरं
सन्ध्यस्थिमज्जगतमप्यथ कुष्ठमीदृक् ॥
नाड़ीव्रणार्व्वुदभगन्दरगण्डमाला-
जत्रूर्द्ध्वसर्व्वगदगुल्मगुदोत्थमेहान् ।
यक्ष्मारुचिश्वसनपीनसकासशोथ-
हृत् पाण्डुरोगगलविद्रधिवातरक्तम्" ॥
इति पञ्चतिक्तघृतगुग्गुलुः ॥ ५६ ॥ * ॥
"श्वेतकरवीरमूलं विषांशकं साधितं गोमूत्रे ।
चर्म्मदलसिध्मपामाविस्फोटक्रिमिकिटिमजित्तैलम्"॥
तिलतैल ४ शेर, गोमूत्र १६ शेर, श्वेतकरवीर-मूल ४ पल, विष ४ पल । करवीरतैलम् ॥ ५७ ॥
"मृतस्य कृष्णसर्पस्य शिरःपुच्छान्त्रवर्ज्जितम् ।
अन्तर्धूमं कृतं भस्म वागुजीतैलमिश्रितम् ।
एतेन मर्द्दनादेव गलत्कुष्ठं विनश्यति" ॥
इति कृष्णसर्पतैलम् ॥ ५८ ॥
"सूतकं गन्धकं कुष्ठं सप्तपर्णञ्च चित्रकम् ।
सिन्दूरञ्च रसोनञ्च हरितालमवल्गुजम् ॥
आरग्वधस्य बीजानि जीर्णताम्रं मनःशिला ।
प्रत्येकं कर्षमेतेषां कटुतैलं पलाष्टकम् ॥
साधयेत् सूर्य्यतापेन सर्व्वकुष्ठविनाशनम् ।
श्वित्रमौडुम्बरं कच्छूं मांसवृद्धिं भगन्दरम् ॥
विचर्च्चिकाञ्च पामानं वातरक्तं सुदारुणम् ।
गम्भीरञ्च तथोत्तानं नाशयेत् यस्य स्पर्शनात् ॥
कुष्ठराक्षसनामेदं सवर्णकरणं परम् ।
अश्विभ्यां निर्म्मितं ह्येतत् लोकानुग्रहहेतवे" ॥
इति कुष्ठराक्षसतैलम् ॥ ५९ ॥
"सूतं गन्धं शिला तालं काञ्जिकैर्मर्द्दयेद्दिनम् ।
तल्लिप्तवस्त्रवर्त्तीं तां तैलाक्तां ज्वालयेदधः॥
स्थिते पात्रे पचेत्तैलं गृहीत्वा लेपयेत्ततः ।
कुष्ठस्थानं विशेषेण सर्व्वकुष्ठं हरत्यलम् ॥
इदं कालानलं तैलं वातकुष्ठे महौषधम्" ।
"एषां समं काञ्जिकं सर्व्वेषां द्विगुणं तिलतैलम् । कल्कं वस्त्रे संलिप्य संशोष्य वर्त्तीं कुर्य्यात् तां तैलाक्तां सन्दंशिकया ज्वालयित्वा उपरि तैलं दत्त्वा ततः पतितं तैलं अधःपात्रे गृह्णीयात् ततः कुष्ठस्थाने दद्यात्" ॥
इति कुष्ठकालानलतैलम् ॥ ६० ॥
"सिन्दूरामृतताललगैरिकहलाजाजीमदयूषबै-
र्हत्यापाषाणरसोनवाणदहनस्नुह्यर्कदुग्धैर्निशा।